## त्रयोदशः पाठः

# परिहास-कथा

(क्त्वा, क्तवतु)

[मिथिला में अपनी बौद्धिक क्षमता तथा परिहास-प्रियता के कारण गोनू झा की बहुत ख्याति है। उस क्षेत्र में प्रत्येक व्यक्ति इनकी कोई-न-कोई कथा सुनाता है जिसमें इनकी प्रत्युत्पन्न बुद्धि की महत्ता मिलती है। प्रस्तुत पाठ में गोनू झा की एक ऐसी कथा दी गयी है जिसमें एक भैंस के बँटवारे का वर्णन है।]



एकदा मित्रयोर्मध्ये एकस्याः महिष्याः विषये अनुबन्धः अभवत्। तेन एकः तस्याः पूर्वार्धभागस्य स्वामी भवेत्, अपरः पश्चाद्भागस्य। पूर्वार्धभागस्य अधिकारी तु मूर्खः आसीत्। अपरस्तु चतुरः। महिष्याः पूर्वार्धभागे मुखं भवति। तस्य स्वामी महिषीं भोजनादिना सेवते। अपरार्धभागस्य स्वामी महिष्याः दुग्धं प्राप्नोति। इत्थं सर्वदा पूर्वार्धस्य अधिकारी एव वञ्चितः भवति स्म।

स एकदा स्वमित्रं गोनू झा नामकं पण्डितं पृष्टवान् – भो: ! किं करोमि ? सदा वञ्चितोऽस्मि । गोनू झा तस्मै समुचितं परामर्शं दत्तवान् । ततः स महिषीं भोजनेन वञ्चितां कृतवान्। महिषी अतीव कुपिता । ततः स तां दोहनकालेऽपि दण्डप्रहारेण कोपितवान् । अथ महिषी कुपिता भूत्वा दोहनकाले पादप्रहारेण चतुरं मित्रं ताडितवती । स अकथयत् – भो: मित्र ! किमिदं करोषि ? मूर्खः पूर्वार्धस्वामी अवदत् – अहं महिष्याः पूर्वार्धस्य स्वामी । यत् मे रोचते तदेव करोमि । अनेन तव किम् ? चतुरः मूको जातः । इदं स्वधूर्ततायाः फलं ज्ञात्वा लज्जितश्च ।

ततः स पुनः महिषीविभाजनं निरर्थकं कथयित्वा तस्या महिष्याः भोजनदाने दुग्धग्रहणे च उभौ स्वामिनौ इति स्वीकृतवान् । तेन उभयोः लाभः। अतः विभाजनं निरर्थकं न शोभते इति उपदेशः ।

## शब्दार्थः

| | | |
|---|---|---|
| एकदा | = | एक बार |
| मित्रयोः | = | दो मित्रों के / में |
| मध्ये | = | बीच में |
| एकस्याः | = | एक की / का / के |
| महिष्याः | = | भैंस के / का / की |
| अनुबन्धः | = | समझौता |
| तेन | = | उसके अनुसार, उससे |
| तस्याः | = | उसका / की / के |
| पूर्वार्धभागस्य | = | आगे के आधे हिस्से का |
| अपरः | = | दूसरा |
| पश्चाद्भागस्य | = | पीछे के हिस्से का |
| चतुरः | = | चालाक, होशियार |

| | | |
|---|---|---|
| प्राप्नोति | = | प्राप्त करता / करती है |
| सेवते | = | सेवा करता / करती है |
| इत्थम् | = | इस तरह |
| वञ्चितः | = | ठगा गया |
| पृष्टवान् | = | पूछा |
| तस्मै | = | उसे , उसको |
| परामर्शम् | = | सलाह |
| दत्तवान् | = | दिया |
| ततः | = | तब |
| दोहनकाले | = | दूहने के समय |
| दण्डप्रहारेण | = | लाठी मार कर |
| कोपितवान् | = | गुस्सा कर दिया |
| भूत्वा | = | होकर |
| पादप्रहारेण | = | पैर चलाकर |
| ताडितवती | = | मारा |
| अकथयत् | = | कहा |
| भोः | = | अरे |
| किमिदम् ( किम्+ इदम् ) | = | यह क्या |
| मे | = | मुझे, मुझको |
| रोचते | = | अच्छा लगता है |
| तदेव ( तत् + एव ) | = | वही |
| अनेन | = | इससे |
| मूकः | = | चुप, मौन |
| जातः | = | हो गया |

| | | |
|---|---|---|
| कथयित्वा | = | कहकर |
| उभौ | = | दोनों |
| स्वीकृतवान् | = | स्वीकार किया |
| उभयोः | = | दोनों का |

# व्याकरणम्

## सन्धिविच्छेदः

| | | |
|---|---|---|
| मित्रयोर्मध्ये | = **मित्रयोः + मध्ये** | (विसर्गसन्धिः) |
| अपरस्तु | = **अपरः + तु** | (विसर्गसन्धिः) |
| वञ्चितोऽस्मि | = **वञ्चितः + अस्मि** | (विसर्गसन्धिः) |
| दोहनकालेऽपि | = दोहनकाले +अपि | (पूर्वरूपसन्धिः) |
| पूर्वार्धस्य | = पूर्व + अर्धस्य | (दीर्घसन्धिः) |
| लज्जितश्च | = लज्जितः + च | (विसर्गसन्धिः) |

## प्रकृति-प्रत्यय-विभागः

| | |
|---|---|
| ज्ञात्वा | = √ज्ञा + क्त्वा |
| कुपिता | = √कुप् + क्त + टाप् |
| वञ्चितः | = √वञ्च् + क्त |
| भूत्वा | = √भू + क्त्वा |
| जातः | = √जन् + क्त |
| कथयित्वा | = √कथ् + णिच् + क्त्वा |

# अभ्यासः

## मौखिकः

1. **अधोलिखितानां पदानाम् उच्चारणं कुरुत -**

प्रत्यग्रबुद्धिः, मित्रयोर्मध्ये, महिष्याः, अनुबन्धः, पूर्वार्धभागस्य, पश्चाद्भागस्य, अपरस्तु अपरार्धभागस्य, वञ्चितः, दोहनकालेऽपि, दण्डप्रहारेण, पादप्रहारेण, ताडितवती, पूर्वार्धस्वामी स्वधूर्ततायाः, लज्जितश्च, दुग्धग्रहणे ।

2. **निम्नलिखितानां पदानां सन्धिविच्छेदं वदत -**

(क) मित्रयोर्मध्ये

(ख) वञ्चितोऽस्मि

(ग) पूर्वार्धस्य

(घ) लज्जितश्च

(ङ) अपरस्तु

3. **गोनू झा से संबंधित या उससे मिलती-जुलती एक अन्य कथा सुनाएँ ।**

## लिखितः

4. **अधोलिखितानां पदानाम् अर्थं लिखत-**

एकदा, महिष्याः, अनुबन्धः, पूर्वार्धभागस्य, पश्चाद्भागस्य, इत्थम्, रोचते ।

5. **अधोलिखितानि पदानि अनुसृत्य सदृशानि पदानि लिखत -**

दुग्धम्, वञ्चिताम्, महिष्याः, वञ्चितोऽस्मि, दण्डप्रहारेण

6. **'परिहास-कथा' पाठ से मिलती-जुलती एक अन्य कहानी लिखें ।**

7. **अधोलिखितानि अशुद्धानि पदानि शुद्धानि कृत्वा लिखत-**

महिस्याः, परामर्षम्, पादप्रहारेन, भोजनादिणा, पृस्टवान्

**8. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत -**

(क) मित्रयोर्मध्ये कस्या: विषये अनुबन्ध: अभवत् ?

(ख) महिष्या: पूर्वार्धभागस्य अधिकारी क: आसीत् ?

(ग) सर्वदा क: वञ्चित: भवति स्म ?

(घ) 'परिहास-कथा' इति पाठेन का शिक्षा मिलति ?

**9. मञ्जूषाया: उचितं पदं चित्वा रिक्तस्थानानि पूरयत -**

| चतुर:, महिष्या:, मूर्ख:, महिषी, मूको (मूक:) |
|---|

(क) एकदा मित्रयोर्मध्ये एकस्या: .................. विषये अनुबन्ध: अभवत् ।

(ख) महिष्या: पश्चाद्भागस्य स्वामी .................. आसीत् ।

(ग) महिष्या: पूर्वार्धभागस्य स्वामी .................. आसीत् ।

(घ) दोहनकाले दण्डप्रहारेण .................. कुपिता जाता ।

(ङ) चतुर: .................. जात: ।

## योग्यता-विस्तार:

### गोनू झा की अन्य कथाएँ

### I. गोनू झा के घर चोर आये

एक रात गोनू झा की पत्नी ने कहा, 'लगता है घर के पास चोर खड़े हैं । अब क्या करें?' गोनू झा ने चोरों को सुनाते हुए कहा, 'तुम चिन्ता न करो । मैंने सारा कीमती सामान बगल के खेत में गाड़ दिया है ।'

यह सुन चोर खेत को कुदाल से खोदने लगे । सुबह होने से पहले गोनू झा पहुँचे और बोले, 'आप सबने मेरा खेत खोद दिया इसके लिए धन्यवाद ।' चोर लज्जित होकर लौट गये ।

कुछ दिनों बाद चोर फिर आये । पत्नी ने कहा, ''लगता है आज फिर चोर आये हैं ।''